# संस्कृतवार्ताः

## आदौ-मुख्यवार्ताः

- प्रधानमन्त्री नरेंद्र-मोदी अद्य वाराणस्यां मॉरीशस्-देशस्य प्रधानमंत्रिणा नवीनचंद्र-रामगुलाम इत्यनेन सह द्विपक्षीय-वार्ताम् अकरोत् ।
- गृहमंत्री अमितशाहः अद्य पञ्च-विमानस्थात्रेषु फास्ट ट्रैक इमिग्रेशन-ट्रस्टेड-ट्रैवलर इत्यस्याः योजनायाः उद्घाटनं कृतवान् ।
- रेलविभागः शनिवासरात् समारभ्य कश्मीरस्य बड़गाम-जनपदात् नवदिल्याः आदर्शनगरस्थात्रं प्रति दैनिक-पार्सल् इत्यस्य सौविध्यं आरप्स्यते ।
- नेपालस्य राष्ट्रपतिः, सेना-प्रमुखः, युवा-प्रतिनिधयः च अन्तरिमसर्वकारस्य निर्माणाय वार्तां विधास्यन्ति ।
- जैस्मीन्-लेम्बोरिया, नूपुर-शेरॉन, पूजारानी च ब्रिटेनस्य लिवरपूल इत्यत्र वैश्विक-मुष्टामुष्टि-प्रतियोगितायां भारताय त्रीणि कांस्यपदकानि विजेतुम् आश्वासितवत्यः ।

## प्रधानमन्त्री-वाराणसीयात्रा

प्रधानमन्त्री नरेंद्र-मोदी अद्य वाराणस्यां मॉरीशस्-देशस्य प्रधानमंत्रिणा नवीनचंद्र-रामगुलाम इत्यनेन सह द्विपक्षीय-वार्ताम् अकरोत् । वार्तायाः अनन्तरं द्वावेव देशौ विभिन्नक्षेत्रेषु चत्वारि सन्धिपत्राणि हस्ताक्षरितवन्तौ । प्रधानमन्त्री रामगुलामः ह्यः आध्यात्मिक-नगरीं वराणसीं प्राप्तवान् । एकस्मिन् संयुक्त-वार्ताहर-सम्मेलने , प्रधान-मंत्री मोदी द्वयोः देशयोः मध्ये सुदृढसम्बान्धानं पुष्टीकुर्वन् प्रोक्तवान् यत् , "भारतं मॉरीशसं च राष्ट्रद्वयं , परञ्च आवयोः स्वप्नं एकम् एव इति प्रधानमंत्री नरेन्द्रमोदी प्रोक्तवान् यत् भारत-मॉरीशस्-राष्ट्रे न केवलं सहयोगिनौ अपितु संयुक्तपरिवारौ स्तः ।

सः प्रोक्तवान् यत् भारतं सदैव मॉरीशस् इत्यस्य संप्रभुतायाः पूर्ण-मान्यताः, औपनिवेशीकरणस्य च समर्थनम् अकरोत् । प्रधानमंत्री नरेंद्रमोदी प्रोक्तवान् यत् भारतात् बहिः प्रथमं जनौषधिकेन्द्रं अधुना मॉरीशस्-देशे स्थापितं वर्तते । सः प्रोक्तवान् यत् ऊर्जासुरक्षे द्विपक्षीय-सहयोगस्य महत्वपूर्णस्तंभौ स्तः ।

प्रधानमन्त्री नरेन्द्रमोदी इदमपि अकथयत् यत् आईआईटी-मद्रासः इत्यनेन इंडियन-इंस्टीट्यूट-ऑफ़-प्लांटेशन-मैनेजमेंट इत्यनेन च मॉरीशस्-विश्वविद्यालयः इत्यनेन सह सन्धिपत्रं हस्ताक्षरितम् ।

द्वयोः नेत्र्योः मध्ये द्विपक्षीय-वार्तायां सहयोगः सम्मिलितः जातः। द्वयोः देशयोः मध्ये विज्ञान-प्रौद्योगिकी- समुद्र-विज्ञान-प्रशासनिक-प्रशिक्षणं-टेलीमेट्री-प्रभृतिषु क्षेत्रेषु चतुर्णां सन्धिज्ञापनानाम् आदानं प्रदानं च सञ्जातम् । विद्युत्क्षेत्र-लघु-विकास-परियोजना-हाइड्रोग्राफी चेत्यादीनां क्षेत्राणां कृते भारतीयानुदान-साहाय्यस्य अपि आदानं प्रदानं च सञ्जातम् ।अनया वार्तया भारत-मॉरीशस-देशयोः मध्ये सभ्यतागत-संबंधानां, आध्यात्मिक-सम्बन्धानां , परस्परजनसम्बन्धानां च स्थायिरूपेण पुष्टीकृता अस्ति ।

ध्यानास्पदं वर्तते यत् मॉरीशस्-देशस्य प्रधानमंत्री सितम्बरमासस्य नवदिनाङ्कात् आरभ्य षोडश-दिनाङ्कपर्यन्तं भारतस्य साप्ताहिक्यां यात्रायाम् अस्ति ।

प्रधानमन्त्री-उत्तराखंड-यात्रा

अद्य सायं , प्रधानमन्त्री उत्तराखंडस्य आपद्- प्रभावितक्षेत्राणां वायवीय-सर्वेक्षणं अकरोत् । वायवीय-सर्वेक्षणानन्तरं , श्रीमोदी अधिकारिभिः सह एकं उच्चस्तरीयं समीक्षोपवेशनम् अपि अकरोत् ।

अमितशाहः-इमिग्रेशन्

गृहमंत्री अमितशाहः अद्य वीडियोकॉन्फ्रेंस इति दृश्य-श्रव्य माध्यमेन लखनऊ, तिरुवनंतपुरम, त्रिची, कालीकट, अमृतसर चेत्यादिषु विमानस्थात्रेषु फास्ट ट्रैक इमिग्रेशन-ट्रस्टेड ट्रैवलर इत्यस्याः योजनायाः उद्घाटनं कृतवान् । अस्य कार्यक्रमस्य उद्देश्यं तीव्रं , सरलं, सुगमं आव्रजनस्वीकरणं अपि च सुगमा अन्तराष्ट्रिय-यात्रा अस्ति । अनेन अन्यदेशेभ्यः आगम्यमानेभ्यः भारतीयनागरिकेभ्यः प्रवासी-नागरिकेभ्यः च अधिक-सौविध्यं प्रदास्यते ।अयं कार्यक्रमः स्वचालित-सीमा-द्वारेषु चलिष्यति अनेन आव्रजनप्रक्रिया मानवीयहस्तक्षेपं विना सरला भविष्यति । अस्मिन् अवसरे श्रीशाहः प्रोक्तवान् यत् फास्ट ट्रैक इमिग्रेशन-कार्यक्रमः एकः विश्वसनीयः यात्रिकार्यक्रमः अस्ति ,

येन आव्रजनप्रक्रिया सरला, तीव्रा बाधारहिता भवति । श्री शाहवर्यः अवदत् यत् एषा योजना गतवर्षे नवदिल्लाम् आरब्धा आसीत्, अद्यावधि देशस्य त्रयोदश-विमानस्थानकेषु एषा सुविधा आरब्धा अस्ति । सः अकथयत् यत् अद्यावधि अस्मिन् सञ्जालपटले त्रि-लक्ष-यात्रिकाः पञ्जीकरणं कृतवन्तः ।श्री शाहवर्यः अवदत् यत् गतेषु एकादशवर्षेषु अन्ताराष्ट्रिय-यात्रा वर्धिता अस्ति । चतुर्दशोत्तर-द्विसहस्रतमाब्दे विदेशं गच्छतां भारतीययात्रिकाणां सङ्ख्या चतुर्पञ्चाशत्-लक्षोत्तर-त्रि-कोटिपरिमिता, यत् अधुना त्रिसप्तति-प्रतिशतं संवर्ध्य प्रायः द्वादशलक्षोत्तर-षट्कोटिमिता अभवत् इति सः सूचितवान्।

अश्विनीवैष्णवः-रेलविभागः

केन्द्रीय-रेलमन्त्री अश्विनीवैष्णवः अद्य प्रोक्तवान् यत् रेलविभागः शनिवासरात् समारभ्य कश्मीरस्य बड़गाम-जनपदात् नवदिल्याः आदर्शनगरस्थात्रं प्रति दैनिक-पार्सल् इत्यस्य सौविध्यं आरप्स्यते ।

नेपाल-अंतरिम-सर्वकारः

प्रवर्तमानस्य राजनैतिक-सङ्घर्षस्य मध्ये अंतरिम्-सर्वकारः इत्यस्य नेतृत्वं सुनिश्चितं कर्तुं राष्ट्रपतिःराम-चंद्र-पौडेलः, नेपालस्य सेना-प्रमुखः अशोकराज-सिडेलः , युवा-प्रतिनिधयः च अद्य वार्तां विधास्यन्ति । प्राप्तसूत्रानुसारं , युवान्दोलनकारिणां प्रतिनिधयः पूर्व-मुख्य-न्यायाधीशं सुशीला-कार्की इत्येतां अंतरिम-प्रधानमंत्री-पदाय प्रत्याशित्वेन विचिन्वन्तः । नेपालस्य सेनया सह युवान्दोलनकारिणां चर्चायां प्रत्यक्ष-रूपेण निर्वाचिता कार्यपालिका-प्रणाली, यूनां सम्मेलयितुं संघीय-संसदः निर्वाचनम्, नवाशीत्यधिक-नवदशशत-तमाब्दानन्तरं सार्वजनिकपदेषु आसीनानां अधिकारिणां संपत्तेः अन्वीक्षणं चेत्यादीनि प्रकरणानि सम्मिलितानि आसन् ।सहैव भ्रष्टाचारप्रकरणानां न्यायिकान्वीक्षणं सांसदानां मन्त्रिपदाय निर्वाचनस्य निषेधं कर्तुं व्यस्थायाः आवश्यकता चेत्यादिषु विभिन्नविषयेषु चर्चा अभवत् ।

पीयूषगोयलः-बिहारः

केंद्रीय-वाणिज्योद्योगमंत्री पीयूषगोयलः अकथयत् यत् भारत-अमेरिकयोर्मध्ये व्यापारिक-संबंधान् सुदृढं कर्तुं वार्ता गंभीररूपेण सकारात्मकरूपेण च अग्रे वर्धते ।अद्य पटनानगरे वार्ताहरैः सह सम्वादं कुर्वन् सः प्रोक्तवान् यत् भारत-अमेरिका-देशौ अधुना यावत् जातया प्रगत्या संतुष्टौ स्तः । श्रीगोयल अकथयत् यत् केंद्रीय-मंत्रिमंडलेन ह्य स्वीकृताभिः मार्ग-रेल-अवसंरचना-परियोजनाभिः बिहारस्य विकासाय गतिः प्रदास्यते ।

## मुष्टामुष्टिक्रीडा

जैस्मीन्-लेम्बोरिया, नूपुर-शेरॉन, पूजारानी च ब्रिटेनस्य लिवरपूल इत्यत्र वैश्विक-मुष्टामुष्टि-प्रतियोगितायां भारताय त्रीणि कांस्यपदकानि विजेतुम् आश्वासितवत्यः।

।। इति वार्ताः।।